# वैयाकरणसिद्धान्तकौमुदीस्थं कारक-प्रकरणम्

प्रस्तोत्री - डॉ. लक्ष्मी शर्मा
( गौविन्दं संस्कृतसदः )

# कारक-शब्दस्य अर्थाः -

- साक्षात्-क्रियाजनकं कारकम्।
- करोति = क्रियां निर्वर्तयति इति कारकम्।
- क्रियान्वयित्वं कारकत्वम्। यस्य क्रियया सह अन्वयः भवति।

कर्तृ-कर्मादिकारकाणि मिलित्वा क्रियां सम्पादयन्ति, अतः तेषां 'कारकम्' इति नाम। सम्बन्धः तु न कारकम्।

कारक-शब्दे धातुप्रत्ययौ -

- धातुः - डुकृञ् करणे
- प्रत्ययः - ण्वुल्
- अर्थः - कर्ता

# कारकप्रकरणम् = विभक्त्यर्थप्रकरणम्

- ❖कारकम् आश्रित्यैव विभक्तयो भवन्ति, अतः कारकस्य अपरं नाम 'विभक्त्यर्थः' अपि वर्तते।
- ❖कारकाणि षट् सन्ति परं विभक्तयः सप्त वर्तन्ते।
- ❖विभक्त्यर्थः = विभक्तीनाम् अर्थः।

**षट् कारकाणि :-**

| | | |
|---|---|---|
| कर्ता | कर्म | करणम् |
| सम्प्रदानम् | अपादानम् | अधिकरणम् |

**सप्त विभक्तयः**

प्रथमा
द्वितीया
तृतीया
चतुर्थी
पञ्चमी
षष्ठी
सप्तमी

# कारकाणां क्रियासम्पादकत्वम्

१. ईश्वरः सर्वत्र व्याप्तः अस्ति। ...कर्तृ...........

२. अहं ओदनं खादामि। ...कर्म...........

३. गोपालः कराभ्यां प्रणमति। ....करणम्.....

४. सर्वकारः वृत्तिरहितेभ्यः सहायताराशिं प्रयच्छति। .सम्प्रदानम्.....

५. छात्राः विद्यालयाद् आगच्छन्ति। अपादानम्......

६. मम पुत्रः गृहे एव पठति। .....सम्बन्धः...

७. वयम् आसन्दिकायाम् उपविशामः। .अधिकरणम्..

धातोः अर्थद्वयं भवति–

व्यापारः  फलं च

गम्–धातुः – उत्तरदेशसंयोगानुकूलो व्यापारः

उत्तरदेशसंयोगः – फलम्, व्यापारः – क्रिया

व्यापारं करोति – कर्ता

उत्तरदेशसंयोगः (फलम्)यत्र भवति तत्– कर्म

1. अहं विद्यालयं गच्छामि।

व्यापाराश्रयः कर्ता

फलाश्रयं कर्म

रामः सीतां पश्यति– अवबोधानुकूलो व्यापारः।

# विभक्तिविधायकानां द्वैविध्यम्

- विभक्तिविधायकानि द्विविधानि सन्ति–

    1. सूत्राणि – **चतुर्थी सम्प्रदाने**
    2. वार्तिकानि च – **तादर्थ्ये चतुर्थी वाच्या**

- एतयोरपि वर्तते द्वैविध्यम्–

1. कारकं सम्बन्धं चाश्रित्य जायमानानि (कारकविभक्तिः)–

    **कर्मणि द्वितीया**

2. विविधशब्दानां योगे जायमानानि– (उपपदविभक्तिः)

    **सहयुक्तेऽप्रधाने**

# विवक्षातः कारकाणि भवन्ति

सर्वाण्यपि कारकाणि वक्तुः इच्छाधीनानि सन्ति।
अस्येदं तात्पर्यम्–

१. अग्निः भोजनं पचति।

अथवा

२. पाचकः अग्निना पचति।

- एतयोः वाक्ययोः उभयत्र 'अग्निः' प्रयुक्तः, परन्तु एकत्र कर्तृतवेन चेत् अन्यत्रा करणत्वेन।